National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(57): 232-234
© 2024 NJHSR
www.sanskritarticle.com

**विवेकत्रिपाठी**
शोधच्छात्रः,
ज्योतिष-विभागः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

**शोधनिर्देशकः -**
**प्रो॰ विनयकुमारपाण्डेयः**
ज्योतिष-विभागः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

**Correspondence:**
**विवेकत्रिपाठी**
शोधच्छात्रः,
ज्योतिष-विभागः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

# ज्योतिश्शास्त्रोक्तमारकेशप्रभावस्य प्रायोगिकमध्ययनम्

**विवेकत्रिपाठी, प्रो॰ विनयकुमारपाण्डेयः**

**शोधोद्देश्यम् -**

लोके तावद्बहवः दैवज्ञाः अवोचनस्माभिर्दरीदृश्यन्ते यद्भवतां जीवने मारकेशस्य दशा प्रचलन्ती अस्तीति, अतस्माच्च जीवने मृत्युसंकटः मृत्युतुल्यकष्टो वा भवान् प्राप्स्यतीत्यादि। किन्तु एतच्छ्रुते सति विचारस्समायातः यत्कीदृशप्रभावः वस्तुत अस्य स्याद्यतोहि मारकेशादिविषयकदशादीनां श्रुतिस्तु लोके बहुधा दृष्टा किञ्च ग्रन्थेषु एतद्विषयकपठनं केषुचिदेवग्रन्थेष्वद्राक्षमत एव एतद्विषयकशोधः प्रायोगिकपुरस्सरं भवतु येनाऽस्य प्रभावविषये (यतोहि मारकेशदशेति नामश्रवणेनैव लोके महद्भीतिः मृत्युतुल्यकष्टमरणादिचिन्तनान्तप्रभृतिकं दरीदृश्यते) अपि च ग्रन्थोक्त विषयेषु च स्पष्टता समागच्छेत् (यतोहि केवलमाचार्यपाराशरेण जैमिनिमुनिना च मारकाख्यविषयः उपतस्थे तथा च वराह-मिहिरवैद्यनाथढुण्ढिराजमहादेवपाठकादिप्रभृतिभिराचार्याः साक्षात्क्वचिदपि मारकादिविषयकं नैव अचर्चयन् एतद्धियैवाऽस्य शोधपत्रस्य लेखनमहं कारिषीय।

**शोधसारः -**

शोधस्यास्य निष्कर्षत्वेन मया प्राप्तं यन्मारकमारकेशादिदशाविषये बहु किमपि भीतियुक्तः दुष्प्रचारः लोके व्याप्तः वर्तते। किन्तु वास्तविकी स्थितिस्तु इयं वर्तते यत् कथञ्चिदपि दशा इयं जीवनस्य सर्वेषु कालेषु कष्टकरी नैव वर्तते अपितु मारकमारकेशादिदशानां प्रभावः तदानीमेव विशेषेण भवति यदा आयुषः समाप्तिकालः अस्ति। अत तस्मिन्नेव काले यदि मारकमारकेशादिदशाः प्राप्यन्ते तदानीं जातकेन मृत्युतत्तुल्यकष्टो वा भवतीति शोधेन अनेन प्राप्तिः।

**शब्दकुञ्जिका -**

मारकः, मारकग्रहः, मारकस्थानम्, मारकेशः, मारकेशदशा, मारकदशा।

**साहित्यसमीक्षणम् -**

एतच्छोधार्थम्मया बृहज्जातकं, जातकपारिजातः, जैमिनिसूत्रं, बृहत्पाराशरहोराशास्त्रप्रभृतयः विंशत्य-धिकज्योतिश्शास्त्रग्रन्थाः परिशीलिताः।

**विषयप्रवेशः -**

म्रियन्ते प्राणिनः यस्मिन् येनेति वा। मृ + घञ् । ततः संज्ञायां कन् इत्येवं रूपेण “मारकः” इति शब्दोऽयं निष्पद्यते। शब्दोऽयं ज्योतिश्शास्त्रप्रसङ्गे परिभाष्यते आचार्यपाराशरेणबृहत्पाराशरहोरायां -

**तनो रन्ध्रं तृतीयञ्च स्थानद्वितयमायुषः। तद्व्ययस्थं द्वितीयं तु सप्तमं चापि मारकम् ॥**[1]

**सप्तमापेक्षया तत्र द्वितीयं प्रबलं मतम्। एतयोरधिपौ वैतत्स्थानगा अशुभास्तथा ॥**[2]

**एतदीशयुताश्चापि मारकाख्याः समे स्मृताः। दशान्तरदशास्वेषां नृणां मरणसम्भवः ॥**[3]

एष एव विषयः लघुपाराशर्यां -

**अष्टमं ह्यायुषः स्थानं अष्टमादष्टमं च यत् ।**
**तयोरपि व्ययस्थानं मारकस्थानमुच्यते।।**[4]

अर्थाज्जन्मकुण्डल्याः द्वितीयसप्तमभावौ अत्र ज्योतिश्शास्त्रे मारकस्थानत्वेनाख्यायेते। एतयो-र्मारकस्थानयोरधिपावेव मारकेशाविति। अनेनैव प्रकारेण साक्षादाचार्यपाराशरस्य अनुसरणं

कृत्वा अयमेव विषयः फलदीपिकायां समुपस्थापितः। तद्यथा -

**द्वावर्थकामाविह मारकाख्यौ तदीश्वरस्तत्र गतो बलाढ्यः।**

**हन्ति स्वपाके निधनेश्वरो वा व्ययेश्वरो वाऽप्यतिदुर्बलश्चेत्॥**[5]

अर्थाद्वितीयेशसप्तमेशौ मारकसंज्ञाकाख्यौ स्तः, तौ च द्वितीय-सप्तमगतौ बलाढ्यौ भवतः। अपि च निर्बलाऽष्टमेषद्वादशेषयोः मार-कग्रहयोर्दशान्तर्दशाकाले च जातकस्य मृत्युर्वाच्या इति।

जैमिनिमुनिना तु स्वकीयजैमिनिसूत्रे कश्चिदन्य एव मारकविषय उपस्थापितः। तद्यथा -

**स्वकर्म चित्तरिपुरोगनाथप्राणिमारकः।**[6]

**चित्तनाथः प्रायेण॥**[7]

अर्थादात्मकारकग्रहस्थानात्तृतीयषष्ठाष्टद्वादशाधिपतित्सु बलिष्ठतर-ग्रहैव मारकाख्य इति। तथा चैतेष्वपि बलिष्ठषष्ठेशः विशेषेण मारकः प्रकीर्त्यते। आचार्यजैमिनिप्रतिपादित निश्चिते च मारकग्रहे कदा मर-णमितिजिज्ञासायामुच्यते -

**तदृक्षदशायां निधनम्।**[8]

अर्थान्मारकग्रहाधिष्ठिततन्निजर्क्षदशायां (महादशेत्यर्थः) वा निधनं वाच्यम्। मारकान्तर्दशानिर्णयश्च -

**तत्रापि कालाद्रिपुरोगचित्तनाथापहारे।**[9]

इत्यमुना सूत्रेण सस्मार आचार्यः। सूत्रार्थश्च वर्तते यत् आत्मकारक-ग्रहाच्छष्ठाष्टमद्वादशस्थानाधिपतित्सु बलिष्ठग्रहान्तर्दशा यदा पूर्वप्र-तिपादितमारकदशायां प्राप्यते तदा मरणमिति। प्रसङ्गेस्मिन्नेव जैमिनिसूत्रटीकोक्ताः काश्चन वृद्धकारिकाः मारकनिर्णयसंबद्धाः उपस्थाप्यन्ते -

**चरे चरस्थिरद्वन्द्वा इति यो राशिरागतः।**

**स एव मारको राशिर्भवतीति विनिर्णयः।।**

**बहुराशि समावेशे बलवान्मारकः स्मृतः।।** (वृ. का.)

कारिकाणां अमीषां अर्थस्तावत्प्रसङ्गवशाद्ग्राह्यं भवति। अर्थश्च भवति यत् "लग्नेशाष्टमेषौ" "शनिचन्द्रौ" "लग्नहोरे" च येषु राशिषु स्थिताः भवेयुस्ते राशयः मारकसंज्ञकाः। यदि एकाधिकेषु राशिषु उपर्युक्ताः लग्नाष्टमेशादयस्संस्थिताश्चेत्तेषु बलिष्ठतरराशिमहादशाया-म्मरणं वाच्यमिति।

अन्ते च हरिशंकरपाठकः स्वकीये संकलनरूपात्मकेदशाफल-दर्पणनामकग्रन्थे द्वितीयतृतीयषष्ठसप्तमाष्टमद्वादशेषु बलिष्ठः ग्रहः मारकत्वेन उक्त्वा कश्चन नूतनैव सिद्धान्तः प्रतिष्ठापितः। यथा च -

**अधुना सम्प्रवक्ष्यामि मारकाख्यं ग्रहं द्विज।**

**तस्मात्फलप्रभेदेन कथयामि तवाग्रतः॥ २५९॥**

**स्वात्मकारकलग्नाच्च चिन्तयेद्विजसत्तम।**

**भ्रातृषष्ठाष्टमं रिःफं धनं द्यूनान्तरेष्वपि॥ २६०॥**

**सर्वेषां बलवान्खेटो मारको ग्रह उच्यते।**

**सर्वैर्बलसमानत्वे मारकः संज्ञको ग्रहः॥ २६१॥**

**षष्ठाधिपस्तु प्रायेण बहुप्रकारेण मारकः।**

**तेषां मध्येऽधिकारी च षष्ठेशो मुख्यकारकः॥ २६२॥**

एतावद्दर्शनेन इदमवगम्यते यत् जैमिनिमुनेः मारकविचारः मारकः इति नाम्ना त्वस्ति किञ्च आचार्यजैमिनिप्रतिपादितमारकविषयः पाराशरमुनिप्रतिपादितमारकेशविचाराच्छर्वथाभिन्नःवराहमिहिरक ल्याणवर्मवैद्यनाथाद्याचार्यप्रतिपादितमृत्युकालज्ञानविषयसममेव व-र्तते, केवलमत्र ग्रहदशापेक्षया जैमिनिमहर्षिणा राशिदशाः स्वीकृताः तावदेव। पुनश्च आचार्यपारशरेण यन्मारकस्थानमुक्तं तद्वस्तुतः आ-चार्यमिहिराद्याचार्यादिसम्मतमेव वर्तते किञ्च पाराशरेण **"भावाद्भा-वमिति सिद्धान्तं"** साक्षादनुक्त्वा अमुमेव सिद्धान्तं साक्षाच्छलो-करूपेण अष्टमादष्टमं नाम द्वितीयादिस्थानान् नामसंकीर्तनेन उपस्थापितमिति। यतोहि "भावाद्भावमिति" सिद्धान्तानुगुणमपि अष्टमं आयुषः स्थानं भवति अष्टमादष्टमाच्च स्थानाद्विशेषेण आयुषश्चिन्तनं कार्यं तथैव यस्य कस्यापि भावस्य क्षयः व्ययो वा वक्तव्यः ततस्माद्व्ययभावादस्य चिन्तनं कार्यमिति। दशाफलदर्प-णोक्ताः विषयास्तु सर्वथाभिन्नाः लोके अश्रुतप्रसिद्धाश्च। अत्र इदमपि अवधेयमस्ति यत् प्रामुख्येन सिद्धान्त उपस्थापकत्वेन पाराशर-जैमिनीं विहाय अन्येन केनचिदपि होराशास्त्रकर्त्रा मारकेशादिनाम्ना कोऽपि विषयः नैव उपतास्थाञ्चकार। बहुत्र होराशास्त्रकर्त्रिभिः केचन मृत्युसंबद्धविषयाः संल्लिखिताः ये च जैमिनिप्रतिपादित-मारकविषयसमा एव किन्तु तैः नामकरणं क्वचिदपि मारकमार-केशादिकं नोल्लिखितम्। तादृश केचन योगाः अधः प्रदर्श्यन्ते। तत्रादौ जातकपारिजाते -

**रन्ध्रेशे रिपुरन्ध्ररिष्फगृहगे तत्पाकभुक्तौ मृतिं।**[10]

अर्थाद्यद्यष्टमेशः षष्ठाष्टमद्वादशगतश्चेत्तस्य पाककाले जातः मृत्युं प्राप्नुयात्। अन्यच्च -

**लग्नेशे निधनारिरिष्फगृहगे साहौ सकेतौ तु वा**

**होरारन्ध्रपसंयुतग्रहदशा जातस्य मृत्युप्रदा।।**[11]

अर्थाल्लग्नेशः षष्ठाष्टमद्वादशगतस्सन्राहुकेतुना वा युतश्चेत् लग्नाष्ट-मेशेन युतग्रहदशायां मृत्युर्वाच्या। एवमेव सारावल्यां -

**क्रूरराशौ स्थितः पापः षष्ठे स्थान्निधनेऽपि वा।**

**तत्स्थितेनारिणा दृष्टः स्वपाके मृत्युदो ग्रहः॥**[12]

स्पष्टार्थकः। अर्थाच्छष्टाष्टे क्रूरग्रहराशौ स्थितखेटः क्रूरग्रहराशिस्थि-तशत्रुक्रूरग्रहदृष्टश्चेच्छवपाके मृत्युदो वाच्यः। अनेनैव प्रकारेण फलि-तमार्तण्डनामकग्रन्थे ईषत्पृथग्विषयः षष्ठेषदशां विहाय (यतोहि प्रायेण सर्वेप्याचार्याः मृत्युविषयकचिन्तने षष्ठेशपाकं अशुभमित्य-वोचन्) मृत्युकालसंबद्धदशा आचार्येण अवाचि। तद्यथा -

**क्रूर-ग्रहस्यैव दशापहारे त्रि-पञ्च-सप्तर्क्ष-पतेर्विपाकः।**

**तथैव जन्माष्टम-नाथ-भुक्तौ चौरारि-पीडां लभतेऽतिदुःखम्॥**[13]

एवमेव जैमिनिमतसममेव अपरः ज्योतिस्सूत्रकारः महादेवपाठकोऽपि ब्रूते -

**सपापे रन्ध्रेशेऽन्त्ये षष्ठे वा अल्पायुः ॥**[14]

**पापा आपोक्लिमस्थाऽल्पायुः ।।**[15]

**लग्नाष्टमेशौ व्ययारिगौ वाऽल्पायुः ।।**[16]

अर्थात् क्रूरसहितलग्नाष्टमेषौ अष्टमषष्ठद्वादशस्थानंगताश्चेजातकोऽल्पायुस्स्यादिति अथवा स्थानानीमानि आयुषये अशुभानीत्यपि वा। अनेनैव प्रकारेण होरारत्नेऽपि अरिष्टविशयकयोगप्रवचनसन्दर्भे आचार्यः षष्ठाष्टरिष्फस्थानान् आयुचिन्तनविषये दुःस्थानत्वेन कीर्तयामास। तद्यथा -

**षष्ठाष्टरिष्फगश्चन्द्रः क्रूरैश्च सह वीक्षितः ।**
**जातस्य मृत्युदः सद्यस्त्वष्टवर्षे शुभेक्षितः॥**[17]

अन्ते च फलितमार्तण्डस्यैव श्लोकैकः समेषूपर्युक्तविषयेषु तारतम्यस्थापनार्थमधः उपस्थाप्यते -

**अल्प-मध्यम-पूर्णायुः प्रमाणमिह योगजम् ।**
**विज्ञाय प्रथमं पुंसां ततो मारक-चिन्तनम् ॥**[18]

अत आहत्य आयुषश्चिन्तनं कृत्वैव मारकदशाप्राप्तौ मृत्युतत्तुल्यकष्टं वा विचिन्तनीयमित्यर्थः। एष एव विषयः प्रश्नमार्गकारोऽपि ब्रूते -

**पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत्।**
**अनायुषां तु मर्त्यानां लक्षणैः किं प्रयोजनम् ।।**[19]

अर्थादाहत्य जातके मारकेशविचारार्थं मारकदशाप्राप्तेसत्यपि अल्पायुर्मध्यमायुपूर्णायुर्योगादीनां चिन्तनं कृत्वैव मृत्युविचारः कर्तव्यः।

इदमिदानीं विचारोऽयं मारकाख्यं प्रायोगिकरूपेण मानवजीवने कियच्छंघटते तदर्थं काश्चन जन्मकुण्डलीन् स्वीकृत्य प्रायोगिकमध्ययनमत्र विधीयते।

उपर्युक्तयोगादिभिः पञ्चाशदधिकजन्मकुण्डलीनां प्रायोगिकाध्ययनानन्तरम् अस्माभिः प्राप्तं यत् वस्तुतः ग्रन्थेषु प्राप्तः मारकाख्यो विचारः मृत्युतत्तुल्यकष्टविषयको वर्तते तत्रापि प्रामुख्येण मृत्युविषयको एवेति। अर्थादादौ आयुसाधनं विधाय पुनः तस्मिन् काले इमे योगाः यदि जीवने प्राप्यन्ते तर्हि तस्मिन् काले जातकस्य मृत्युर्विचिन्त्या, न तु जीवने यस्मिन् कस्मिन्नपि काले मारक मरकेशदशा प्राप्यते तदानीं यथा लोके प्रसिद्धिर्वर्तते यज्जातकः बहु कष्टभाग्भवतीत्यात्यदिकं। यतोहि अस्माभिः प्रायोगिक परीक्षणेनापि जनेभ्यः पृष्टेसति इदमेव प्राप्तं यत् मारकेशदशायां तथा किमपि विशिष्टकष्टमथवा जीवने बहु संघर्षादिकं नैव भवति।

**निष्कर्षः -**

अत निष्कर्षत्वेन इदमेव प्राप्तं यन्मारकदशया न तथा कापि आवश्यकता वर्तते भीतेः। वस्तुतः मारकमारकेशादिदशानां प्रमुखं फलं सर्वाचार्यसंमतञ्च इदमेव अस्ति यत् जीवनस्य अन्तिमावस्थायां (आयुषः समाप्ति दशायां) यदीदृग्दशाः प्राप्यन्ते तर्हि एषु दशाष्वेव जातकस्य मरणं स्यादिति।

**सन्दर्भ**


1. बृहत्पाराशरहोराशास्त्रम्, अ ४५, श्लोक ७
2. बृहत्पाराशरहोराशास्त्रम्, अ ४५, श्लोक ८
3. बृहत्पाराशरहोराशास्त्रम्, अ ४५, श्लोक ९
4. लघुपाराशरी/श्लोक-२३
5. फलदीपिका, अध्याय २०, श्लोक ४०
6. जैमिनिसूत्रम्, अध्याय-२,श्लोक-५७
7. जैमिनिसूत्रम्, अध्याय-२,श्लोक-५८
8. जैमिनिसूत्रम्, अध्याय-२,श्लोक-५९
9. जैमिनिसूत्रम्, अध्याय-२,श्लोक-५९
10. जातकपारिजात, अध्याय १४, श्लोक ५४
11. जातकपारिजात, अध्याय १४, श्लोक ५५
12. सारावली, अध्याय ४२, श्लोक ३
13. फलित मार्तण्ड, अध्याय १६, श्लोक १७
14. तकतत्वम्, अध्याय ८, सूत्र २१
15. जातकतत्वम्, अध्याय ८, सूत्र २२
16. जातकतत्वम्, अध्याय ८, सूत्र २३
17. होरारत्नम्, अध्याय ५, श्लोक १
18. फलित मार्तण्ड, अध्याय १८, श्लोक १
19. प्रश्नमार्गः, अध्याय ९, श्लोक ०३